# आचार्यद्वितीयवर्षम्

## चतुर्थपत्रम- प्राचीनन्यायवैशेषिकम्, शैक्षिकनिष्पत्तिः

**ग्रन्थः –न्यायसारः)हेत्वाभासनिरूपणात् आन्तम्**

**अमुं पाठ्यग्रन्थम् अधीत्य छात्राः**

- ❖ हेत्वाभासान्, तदवान्तरभेदान् उदाहरणाद्यवयवपरिशीलनं, वाद-जल्प-वितण्डा च्छलानां स्वरूपविभागादीन्, जाति-निग्रहस्थानयोः लक्षण-स्वरूप-विभागादीन्, तत्र तत्र मतान्तपरिशीलनं, चाधिगन्तुं शक्नुयुः।
- ❖ आगमलक्षणं, बौध्दाभिमतप्रमाणद्वैविध्यनिश्चयपरिशीलनं, शब्दस्याभिप्रायानुमापकत्वनिरासं, वैदिकवाक्यानां प्रामाण्यव्यवस्थापनं, वेदस्य पौरुषेयत्वपरिशीलनं, सत्यसंकल्पस्य वेदकर्तृत्वसिध्दिं, वैदिकवर्णानुपूर्वीणामनित्यत्वं, शब्दानित्यत्वपरिशीलनं च विजानीयुः।
- ❖ उपमानस्य पृथक्प्रामाण्यनिरासपरिशीलनम्, अर्थापत्ति-ऐतिह्य-सम्भव-चेष्टा-अभावानां प्रमाणान्तरत्वखण्डनप्रकारं, प्रमाणप्रयोजनं, प्रमेयाणां स्वरूपलक्षणविभागादीन्, दुःखस्वरूप-विभाग-कारणानि च ज्ञातुं प्रभवेयुः।
- ❖ आत्मस्वरूपविभागादीन्, ईश्वरे प्रमाणव्यवस्थापनम्, आप्तकामस्यपि ईश्वरस्य जगत्सृष्ट्यादिकर्तृत्वानुशीलनम्, आत्मज्ञानस्य मोक्षहेतुत्वम्, ईश्वरज्ञानादेः नित्यत्वपरिशीलनम्, ईश्वरस्य-वेद-शास्त्रादिकर्तृत्वं, कर्मवैयर्थ्यपरिहारं, जन्म-मरणयोः वैचित्र्यं च ज्ञातुं शक्नुयुः।
- ❖ अचेतनानां चेतनाधिष्ठितत्वम्, आत्मनः शरीरेन्द्रियादिव्यतिरिक्तत्वपरिशीलनं, शरीरेन्द्रियादेः ज्ञानेच्छाद्यनाश्रयत्वं, क्षणिकवादपरिशीलनं, कार्यकारणभावपरिशीलनं, शक्तिस्वरूपं, ध्वंसस्य अविनाशित्व-अविकारित्वादिपरिशीलनं, भावाभावयोः भेदं, तमोवादम्, आत्मवादे सौगतार्हतादिमतपरिशीलनं च ज्ञातुं प्रभवेयुः।
- ❖ सत्कार्यवादपरिशीलनम्, अनिर्वचनीयवादपरिशीलनं, योगद्वैविध्यं, तपसो धर्महेतुत्वं, योगाङ्गानि, दिक्कालयोः ईश्वरानतिरिक्तत्वं, मोक्षस्वरूपं, मोक्षे सुखाभिव्यक्तौ न्यायसम्मतिं, नित्यसुखरागस्य बन्धनरूपत्वं चावगन्तुं शक्नुयुः।

*********